# संस्कृतवार्ता:

दिनाङ्क :- 01/03/2025 सायम् - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

आदौ मुख्यवार्ताः

- प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य नवदिल्ल्याः भारतमण्डपे पञ्च विंशत्यधिक द्वि सहस्र तमवर्षीयं एन्. एक्स . टि. इति सम्मेलनं सम्बोधयता निगदितं यत् अनेकेभ्य: दशकेभ्य: विश्वेन भारतं बैंक-ऑफिस इति मानितम् परञ्च सम्प्रति भारतं विश्वस्य नवीन- यन्त्रागारत्वेन उदीयमानं भवतीति।
- केन्द्रीयगृहमन्त्रिणा अमिशाहेनाद्य मणिपुरराज्ये सुरक्षास्थिते: समीक्षायै नवदिल्ल्यां समीक्षोपवेशनम् समाहूतम्।
- अमरीकादेश: सूचितवान् यत् यूक्रेनदेशस्य राष्ट्रपति: वोलोडिमिर-जेलेंस्की इत्येष: ओवल-ऑफिस इत्यत्र कार्यालये सञ्जाताय मौखिक-विवादाय राष्ट्रपतिं ट्रम्प इत्येनं याचनाम् अभियाचेत्।
- सुरक्षाविपत्तिम् आलक्ष्य ताइवानदेशेन सप्तविश्वविद्यालय: प्रतिबन्धिता: ये चीनदेशस्य राष्ट्रिय-रक्षाया: सप्तपुत्रा: इति उच्यन्ते।

---------------------------------------

प्रधानमन्त्री-एन एकस्टी-सम्मेलन

प्रधानमन्त्रिणा नरेन्द्रमोदिना निगदितं यत् यत् सकलं हि विश्वम् एकविंशतिशताब्द्याः भारतं प्रति उत्कण्ठया पश्यतीति । अद्य नवदिल्ल्याः भारतमण्डपे पञ्च विंशत्यधिक द्वि सहस्र तमवर्षीयं एन्. एक्स . टि. इति सम्मेलनं सम्बोधयन् श्रीमोदी अवदत् यत्, विश्वस्मात् जनाः एनं भारतदेशं ज्ञातुं जिज्ञासायुतदृष्ट्या सह समागच्छन्तीति। यत्र निरन्तरं सकारात्मकवार्ताः निर्मीयन्ते, प्रतिदिनं च नूतनाः विषयाः भवन्ति। सः अपि अवदत् यत्, प्रयागराज-नगरे सम्पन्न:

एकतायाः सङ्गमः महाकुभः, सम्पूर्णे विश्वे विस्मयं जनयति यत्, कथं कोटिशः जनाः नद्याः तटे अस्थायि-नगरे पवित्रं स्नानम् अकुर्वन् इति।

असौ अग्र अवोचत् यत् सम्प्रति आयुष-उत्पाद: योगश्च वैश्विकस्तरे गण्येते। अपि च अनेकेभ्य: दशकेभ्य: विश्वनभारतं बैंक-ऑफिस इति मानितम् परञ्च सम्प्रति भारतं विश्वस्य नवीनं यन्त्रागारं भवतीति। साम्प्रतं च एकमात्रं कार्यबलं नस्ति अपि तु विश्वशक्ति-केन्द्रत्वेन भारतम् उदीयमानं वर्तते। असौ उल्लिखितवान् यत् येषां वस्तूनां देश: आयातं कुर्वन् आसीत् अधुना तेषाम् उत्पादनं स्थानीयस्तरे भवतीति अपि च देशोऽयं तेषाम् उत्पादानां निर्यातकेन्द्रत्वेनापि उदीयमानो वर्तते। प्रधानमन्त्रिणा निर्धारित लक्ष्याणां प्राप्तिनां श्रेय: न्यूनतम प्रशासनं अधिकतमं शासनं इत्येतस्मै मन्त्राय प्रदत्त:। अनेनोक्तं यत् भारतम् असीमित-नवाचाराणां भूमिरपि अस्ति।

---------------------------------------

प्रधानमन्त्री-कृषि

प्रधानमन्त्री नरेन्द्रमोदी प्रत्यपादयत् यत् अस्य वर्षस्य केन्द्रीयार्थ सङ्कल्पनापत्रस्य उद्देश्यं कृषि क्षेत्रम् अधिकं स्थिति स्थापकत्वं समृद्धं च कर्तुं भवतीति। प्रधानमन्त्री मोदी अद्य कृषि-ग्रामीण-समृद्धौ अर्थसङ्कल्पनापत्रस्य् पश्चादेव एकाम् आभासिय-कार्यशालां सम्बोधयन् कथितवान् यत् देशस्य विकसित-भारतस्य लक्ष्यं प्रति अग्रे वर्धितुं संकल्प: सुस्पष्टो विद्यते। असौ अग्रे प्रवोचत् यत् कृषि क्षेत्रं विकासस्य प्रमुख-माध्यमम्इति मन्यमानं प्रशासनम् कृषकाणां कृते गौरवपूर्वकं स्थानम् प्रददात्।

अमुना भणितं यत् वयं मिलित्वा भारतस्य निर्माणार्थं कार्यं कुर्वन्त: स्म: यत्र कृषका: समृद्धा: सशक्ता: च भवेयु: इति। श्रीमोदिना प्रतिपादित यत् अस्माभि: द्वयो: प्रमुखयो: लक्ष्ययो: कृते कार्यं विधीयते ययौ कृषिक्षेत्रस्य विकास: अथ च ग्रामाणां समृद्धि: स्त: प्रशासनेन केन्द्रीयार्थसङ्कल्पपत्रे प्रधानमन्त्री-धन-धान्य-कृषि-योजना समुद्घोषिता यस्या: अन्तर्गतं देशे अल्पमानानां कृषि-उत्पादकयुतानां दश जनपदानां विकासाय ध्यानं प्रदास्यते।

---------------------------------------

प्रधानमन्त्री-सम्मेलनम्

प्रधानमन्त्री नरेन्द्रमोदी अद्य श्रीलङ्कादेशस्य प्राक्तनेन राष्ट्रपतिना रानिल-विक्रमासिङ्घे इत्यमुना सह तथा च ऑस्ट्रेलियादेशस्य पूर्व-प्रधानमन्त्रिणा टोनी-एबॉट-इत्यनेन साकं नवदिल्ल्याम् साकं नवदिल्ल्यां आयोजिते एन.एक्स.टी- इत्याभिनामधेयके सम्मेलने मेलनं कृतवान् एकस्मिन् सामाजिकान्तर्जालीय-सन्देशपटले श्रीमोदिना विविधेषु विषयेषु श्री विक्रमसिंघे इत्येतस्य दृक्पातस्य प्रशंसां विहिता। तत्रैव ऑस्ट्रेलियादेशीयेन पूर्व-प्रधानमन्त्रिणा सह मेलने हर्ष: प्रकटयता श्रीमोदिना उल्लिखितं यत् श्रीएबॉट इत्यसौ सर्वदैव भारतस्य मित्रमस्ति। प्रधानमन्त्री एतस्मिन् कार्यक्रम रूसदेशस्य प्रमुखान्तरिक्षयात्रिणा ओलेग-आर्टेमयेव इत्येतेन लेखकेन एलेकरॉस इत्यनेन प्रमुखामरिकीय भौतिक-वैज्ञानिकेन डॉ. ब्रायन-ग्रीन-इत्यमुन साकमपि मन्त्रणां समाचरितवान्।

---------------------------------------

केन्द्रीयगृहमन्त्री

केन्द्रीयगृहमंत्री अमिशाहेनाद्य मणिपुरराज्ये सुरक्षास्थिते: समीक्षायै नवदिल्ल्यां समीक्षोपवेशनम् समाहूतम्। तथा च मार्चमासस्य अष्टम-दिनाङ्कात् राज्यस्यास्य सर्वेषु मर्गेषु जनानां निर्बाधतया आवागमनं सुनिश्चितुं निर्देशोऽपि प्रख्यापित:। मणिपुरस्य राज्यपालस्य अजयकुमारभल्ला इत्येतस्य उपस्थितौ अस्य समीक्षोपवेशनस्य अध्यक्षतां कुर्वन् श्रीशाह: मार्गेषु अवरोधं जनयमानानां जनानां विरूद्ध काठिन्यं कार्याचरणं कर्तुं निर्देशं प्रदत्तवान्। श्रीशाह: निर्दिष्टवान् यत् मणिपुरस्य अन्ताराष्ट्रिय सीमायां निर्दिष्टानां प्रवेशस्थानानाम् उभयो: स्थानयो: वेष्टनकार्यं यथाशीघ्रं समापयेत् इति। उपवेशनावधौ श्रीशाह: मादकद्रव्याणां अवरोधनं कृत्वा प्रोक्तवान् यत् नरेन्द्रमोदिप्रशासनं मणिपुरराज्ये स्थायिशान्तिं स्थापयितुं पूर्णतया प्रतिबद्धं वर्तते। एतस्मिन् प्रकरणे च आवश्यकं साहाय्य-मपि प्रददाति। विगतमासे राज्येऽस्मिन् राष्ट्रपतिशासनान्तरं इदं प्रथमोपवेशनम् सञ्जातम्।

---------------------------------------

छत्तीसगढ़ संघर्षम्

छत्तीसगढे सुकमामण्डले अद्य सुरक्षाबलेन सह जाते सङ्घर्षे द्वौ माओवादिनौ मारितौ। किस्तराम-क्षेत्रे माओवादिनाम् उपस्थितेः विषये गुप्तचरसूचनाः प्राप्तेः अनन्तरम् डीआरजी-सीआरपीएफ इत्येतयोः संयुक्तदलं तत्र गतम्।

---------------------------------------

<u>उत्तराखण्ड - माणा उद्धारः</u>

उत्तराखण्डस्य चमोलीमण्डलस्य माणाग्रामे हिमस्खलनस्य अनन्तरं उद्धारकाः पञ्चाशत् श्रमिकान् सुरक्षिततया निष्कासितवन्तः इति अधिकारिणः उक्तवन्तः। पञ्चश्रमिकाणां अन्वेषणप्रयासाः निरन्तरं प्रचलन्ति। इदानीं अधिकारिणः चतुर्णां व्रणित-श्रमिकाणां मृत्योः पुष्टिं कृतवन्तः।

---------------------------------------

<u>रूबियो-ट्रम्प-जेलेंस्कीइत्येता:</u>

अमरीकादेश: सूचितवान् यत् यूक्रेनदेशस्य राष्ट्रपति: वोलोडिमिर-जेलेंस्की इत्येष: ओवल-ऑफिस इत्यत्र कार्यालये सञ्जाताय मौखिक-विवादाय राष्ट्रपतिं: ट्रम्प इत्येनं याचनाम् अभियाचेत्। रूबियोइत्येतस्य इदं वक्तव्यं व्हाइट हाउस इत्यत्र अमरीकीय राष्ट्रपतिना डोनाल्डट्रम्प इत्यमुना उपराष्ट्रपतिना वेंसइत्येतेन सह जेलेंस्की इत्येतस्य विवादानन्तरम् समागतम्।

---------------------------------------

<u>ताइवानदेश:</u>

ताइवानदेशेन सप्तविश्वविद्यालय: प्रतिबन्धिता: ये चीनदेशस्य राष्ट्रिय रक्षाया: -सप्तपुत्रा: इति उच्यन्ते यतोहि एते विश्वविद्यालय: राष्ट्राय एतस्मै सुरक्षाविपत्तिम् जनयन्ति।

---------------------------------------

<u>संस्कृत-साप्ताहिकी</u>

प्रिया: श्रोतार:, संस्कृतजगता सम्बद्धै: विभिन्नै: क्रियाकलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ.एम.गोल्ड-प्रवाहिकात: रविवासरे मध्याह्ने सार्धैक-वादनत:भविष्यति। कृपया श्रृण्वन्तु।

।। इति वार्ता:।।